# संस्कृतदूतकाव्ययेषु मेघदूतस्य प्रभावः

**सुजीत कुमार***

कवेः कर्म काव्यम्। दूतमधिकृत्य काव्यं दूतकाव्यम्। यद्यपि संस्कृतलक्षणग्रन्थेषु दूतकाव्यस्य लक्षणस्य उल्लेखो नोपलभ्यते। काव्यस्यलक्षणानुसारं दूतकाव्यस्य काव्यत्वं वर्तते। श्रव्यदृश्यभेदेन काव्यस्य द्वौ भेदौ वर्तते। यस्मिन् दृश्यं नाटकं वर्तते। श्रव्यकाव्यान्तर्गतं पद्यं गद्यं मिश्रं भेदत्रयम्। पद्यकाव्यान्तर्गतं महाकाव्यं खण्डकाव्यं च मुक्तकाव्य´च सन्ति। साहित्दर्पणे खण्डकाव्येषु महाकाव्यस्य किं˝चत् लक्षणं भवति। अतएव अस्मिन् प्रसÂ मेघदूतस्योद्धरणं प्रदत्तम्। अतः दूतकाव्यं खण्डकाव्यमेव भवति।

सर्वप्रथमं दूतकाव्यस्याविर्भावः वैदिकसाहित्ये ऋग्वेदे सरमापणिसम्वादे प्राप्यते। तदारभ्याद्यावधिः रामायणमहाभारतकाव्ययोः दूतानां प्रभूतोदाहरणानि मिलन्ति। स्वतन्त्ररूपेण किमपि दूतकाव्यमस्ति तद् मेघदूतमेव। यद्यपि कालिदासस्य समयनिर्धारणं विवादास्पदं तथापि प्रथमशताब्दी बहुभिः स्वीक्रियते। कालिदासस्य मेघदूते कुबेरेशापेन शप्तः कोऽपि यक्षः एकवर्षं यावत् रामगिरिपर्वते वसति। स नवपरिणीतां विशालाक्षीं नामाख्यं भार्यां प्रति सन्देशान् मेघमाध्यमेन प्रेषितवान्। पूर्वमेघम् उत्तरमेघम् इति भागद्वयं काव्यस्य वर्तते।

संस्कृतसाहित्यारम्भः कालिदासस्य मेघदूतात् भवति। तदारम्भ्यः अद्यावधिः कथा–छन्द–रस–गुण–रीति–अलÁारादीनां मेघदूतमिवानुकरणं भवति अन्येष्वपि दूतग्रन्थेषु। न केवलं भारतसाहित्येऽपितु अन्ताराष्ट्रियसाहित्येषु मेघदूतस्य प्रभावाः प्रकटिताः भवन्ति। पश्चाद्वर्ति दूतकाव्येषु प्रायशः मन्दाक्रान्ता छन्दसो विधानं भवति। विप्रलम्भश्रृंगारस्य विधानं सर्वाधिकं दूतकाव्येषु भवति। उपमारूपकानुप्रासादयः अलÁारा प्रयुज्यते। तथा च वैदर्भीरीतिः प्रायः प्रयुज्यते। कथायां नायकनायिकायोर्मध्ये सामान्यतः विच्छेदनकारणात् शोकः उत्पन्नो भवति। यस्मात् कारणात् नायकनायिकाभ्यां सन्देशोऽपरं प्रति प्रेष्यते। अनुकरणग्रन्थेषु विंशतिशताब्द्यां परमेश्वरझाद्वारा लिखितं 'यक्षसमागम' काव्यं मेघदूतस्य पूरककाव्यमस्ति। यस्मिन् यक्षः शेषान् चतुरो मासान् यापयित्वा यक्षिणीं प्राप्नोति तथा च स्वप्रेयसीं प्रति प्रणयं निवेदयति। यस्मिन्काव्ये यक्षस्य सम्पूर्णप्रणयकथा वार्णितास्ति। विंशतिशताब्द्यामेव मन्दिकलरामशास्त्रीं मेघप्रतिसन्देशं लिखति। यस्मिन् मेघो यक्षिणीं यक्षस्य सन्देशान् निवेदयति तदनन्तरं यक्षिणी स्वसन्देशेन सह मेघं

***शोधच्छात्र संस्कृत विभाग, इलाहाबाद विश्वविद्यालय, इलाहाबाद  सुजीत  कुमार**



यक्षस्य समीपं पुनः प्रेषयति।

ईदृग्विधानि अपि कानिचन दूतकाव्यानि सन्ति येषां रचना मेघदूतस्य पद्यस्य चतुर्थपादस्य स्वीकृत्य समस्यापूर्तिग्रन्थरूपेण कृता। जिनसेनः पार्श्वाभ्युदयः विक्रमकवेः, नेमिदूतम्, चरित्रसुन्दरमणेः शीलदूतम्, चेतोदूतम्, मेघविजयस्य, मेघदूतसमस्यालेखः इत्यादिनि काव्यानि ईदृग्विधान्येव सन्ति। एतेषामुपर्युक्तानि विवरणानि। मेघदूतात्परं यानि दूतकाव्यानि लिखितानि तेषु प्रायः मन्दाक्रान्ता छन्दसः प्रयोगाः वर्तन्ते। तथापि तानि काव्यानि येषु मन्दाक्रान्तातिरिक्तानि छन्दासि प्रयुक्तानि तेषां संख्यासीमितमेव वर्तते। कथायां प्रायः विप्रलम्भश्रृंगारस्य प्राधान्यं वर्तते। यद्यपि जैनसाहित्ये धर्मप्रधानानि काव्यानि सन्ति तथापि उपदेशाः तेषां भक्तिप्रेममयसंसारविप्रयुक्तेभ्यो दन्ताः सन्ति। पार्श्वाभ्युदयकाव्ये राज्ञो भ्रात्रोः मध्ये एतादृशी कथास्ति। यद्यपि इदं काव्यं मेघदूतस्य काव्यमस्ति।

नेमिदूत काव्येऽपि परिणयसूत्रबन्धनसमीपं गतः नेमिनाथः कथञ्चित् दयाभावात् संसारात् विरक्तोऽभवत्। कन्याराजमती नेमिनाथं प्रति सन्देशान् कथयति। अत्र प्रायशः कथा–रस–छन्दोविधानादिषु मेघदूतेन समानता वर्तते। जैनमेघदूतस्य कथा नेमदूतस्यैवास्ति परन्तु मात्रमेकमेव मेघदूतेन सह समत्वं यत् मन्दाक्रान्ता छन्दसः प्रयोगः।

शीलदूतकाव्यं मेघदूतस्य समस्यापूर्तिः ग्रन्थः यस्मिन् मेघदूतस्य पद्यानामन्तिमचरणं निधाय काव्यं लिखितमस्ति। यस्मिन् प्रणयसन्देशाः प्रियायै प्रेषिताः सन्ति यद्यपि श्रृंगारप्रसÂ शान्तरसपरकानि पद्यान्यपि विनिर्मितानि। 'चेतोदूतम्' नामाख्ये दूतकाव्ये मेघदूतस्य चतुर्थपद्यान्यपि आहृत्य लिखितानि। मन्दाक्रान्ता छन्दसः सर्वत्र वर्तते। परन्तु अस्मिन् दूतरूपेण चेतसः प्रयोगोऽभवत्। 'मेघदूतसमस्यालेख' इति नाम्ना एव स्पष्टमस्ति। यत् दूतकाव्यमात्रं समस्योल्लेखोस्ति।

प्रायः दूतकाव्यानां परम्परायां बहूनि दूतकाव्यानि समस्यापूर्तिरूपेण लिखितानि यस्मिन् प्रथमं काव्यं वादिचन्द्रसूरकवेः 'पवनदूतम्' काव्यमस्ति मन्दाक्रान्ताछन्दसः मिलितम्। काव्येऽस्मिन् स्वराज्ञीं प्रति पवनद्वारा सन्देशान् प्रेषयति तदा सद्यः मेघदूतस्य प्रभावः परिलक्ष्यते। 'इन्दुदूताख्यं' काव्यमपि मेघदूतस्यानुकरणमस्ति इन्दुदूतकाव्यस्यान्ते 'इति श्रीमेघदूतच्छायाकाव्यमिन्दुदूताभिधं काव्यं समाप्तं लिखितमस्ति।

सामान्यरीत्या लिखितेषु काव्येषु पवनदूतस्य नाम प्रथममस्ति। यद्यपि धोयिकविना रचनायां कुत्रापि मेघदूतस्योल्लेखो न कृतः तथापि तुलनाप्रसÂ सद्यः प्राकट्यमायाति यत् छन्दोविधानं वस्तुप्रयोगाः रसान्वितिः प्रकृतिवर्णनम्, दूतस्य चयनं मेघदूतेन समं वर्तते। अतः पूर्ववर्तिनां प्रभावः परवर्तिनामवश्यमेव भविष्यति। पूर्णसारस्वतेन लिखिते हंससन्देशकाव्ये छन्दोलÁारकथासामग्री मेघदूतप्रभावेन प्रभाविता यद्यपिपूर्णसारस्वतेन काव्यस्यैकस्मिन् श्लोके कालिदासस्य मेघदूतस्योल्लेखः कृतः। अन्यत्र मेघदूतस्योपरि विद्युल्लतानाम्नी टीकाऽपि लिखिताऽनेन कविना। एकमपरं

हंससन्देशनामकं काव्यं वेदान्तदेशिकं लिखितमस्ति। यद्यपि यस्मिन् काव्ये मेघदूतस्योल्लेखो न भवति तथापि छन्दोविधाने दूतस्य प्रयोगो वा दूतरुपेण मेघहंसयोस्तुलनाप्रसÂ स्पष्टं भवति यद् मेघदूतस्यैव प्रभावोऽस्ति।

शुकसन्देशोपरि मेघदूतस्य स्पष्टप्रभावः वर्तते। यतोहि शुकसन्देशस्य प्रथमभागे मार्गवर्णनं द्वितीयभागे नायिकायाः विरहावस्थावर्णनं, तस्याः शन्देशकथनमप्यास्ति। मन्दाक्रान्ताछन्दसि निबद्धे काव्येऽस्मिन् श्रृंगारसानुकूल–प्रसादगुणसमोपेतललितभाषायां काव्यस्य रचना कृतास्ति।

वामनभट्टबाणस्य विरचिते 'हंसदूते' नगरनदीपर्वतादिवर्णनं कालिदासस्य मार्गवर्णनस्य स्मरणं कारयति। मन्दाक्रान्ता छन्दस्सु नायकः नायिकायां सन्देशान् प्रेषयति। हंसिनीद्वारा यद्यपि कविविष्णुदासः मेघदूतादेव प्रेरणां गृहीत्वा 'मनोदूतकाव्यस्य' रचनां कृतवान्। परन्तु मन्दाक्रान्ता छन्दस्थाने वसन्ततिलका छन्दसः प्रयोगः श्रृंगाररसस्थाने शान्तरसान्वितिः, श्रीकृष्णं प्रति भक्त्यादरयोः वर्णनम्। कि´चत् कि´चत मेघदूतात् स्वतन्त्रं करोति परन्तु मेघदूतस्यैवानुकृतिरियम्।

कोकसन्देशोऽपि विप्रलम्भश्रृंगारप्रधानकाव्यमस्ति। एतस्य रचना विष्णुत्रातेन मेघदूतस्य मापदण्डमनुक्षयकृता। विरहिणी नायिका कोकद्वारा सन्देशान् नायकं प्रति प्रेषयति। कामारामनगर्याः वर्णनम्, कालिदासस्यानुकरणं प्रकटयति रूपगोस्वामिद्वारा श्रीमद्भागवद्कथामनुश्रित्य 'उद्धवसन्देशः' काव्यस्य रचना कृतास्ति। परन्तु मन्दाक्रान्ता छन्दसः प्रयोगः गोपाÂनानां विरहावस्था, श्रीकृष्णस्योद्धवद्वारा सन्देशप्रेषणमेतत्सर्वम्। मेघदूतस्य प्रभावेणैव सम्भवं भवति। इतोऽपि श्रीमद्भागवतमाश्रित्य रूपगोस्वामिकविना हंसदूतनामाख्यमपरं काव्यस्य रचनाकृता। यद्यपि कथासामग्री अत्र कल्पनाश्रितास्ति। काव्यं शिखरिणी छन्दोबद्धमस्ति। सम्पूर्णसन्देशाः हंसमाध्यमेन प्रेषिताः सन्ति।

माधवकवीन्द्रः अपि 'उद्धवदूत' नामाख्यं काव्यं रचितम्। यत्र हंसदूतकाव्ये शिखरिणी छन्दसः प्रयोगः तत्रास्मिन् काव्ये मेघदूतमिव मन्दाक्रान्ता छन्दसः प्रयोगः पूर्वोत्तरभागौ विभक्तौ काव्यस्य नायकः कृष्णः नायिका राधा। राधा उद्धवद्वारा सन्देशान् श्रीकृष्णं प्रति प्रेषितवती। कविः रूद्रप´चाननः 'भ्रमरदूतकाव्यम्' कृतवान् अस्ति। मेघदूतकाव्यमनुसृत्य काव्येऽस्मिन् विप्रलम्भश्रृंगाररस्यास्वादनं मन्दाक्रान्ता छन्दसि भवति। प्रकृतिर्वर्णनम्, मार्गनिर्देशनम् श्रीरामचन्द्रः हनुमन्तं प्रति करोति। तथा च सन्देशान् सीतायाः पार्श्वे प्रेषयति। रूद्रन्यायप´चाननस्य 'पिकदूतकाव्यम्' केवलं त्रिंशत् श्लोकेषु बद्धं शार्दूलविक्रीडितछन्दसि विरचितमस्ति। केवलं मेघदूतपरम्परायाः निर्वाहः अस्मिन् काव्येऽस्ति।

'भृXदूतकाव्यम्' मेघदूतस्य शुद्धानुकृतिरस्ति। शतावधानकविश्रीकृष्णदेवस्य अस्मिन्काव्ये मन्दाक्रान्ता छन्दःसु यत्र तत्र मेघदूतस्य प्रभावः स्पष्टरूपेण प्रकटितो भवति। यद्यपि भृXदूतमधिकृत्य गोपिका श्रीकृष्णस्य कृते सन्देशान् प्रेषयति। कृष्णसार्वभौमस्य 'पदाप्रदूतम्' तैलXव्रजनाथस्य 'मनोदूतम्' उभयोः मेघदूतमनुकृत्यं



रचना कृतास्ति। 'वातदूतकाव्यं रामायणकथाश्रितं प्रायः मेघदूतस्य प्रभावः बिभर्ति। नित्यानन्दशास्त्रिमहोदयः 'हनुमद्दूतम्' लिखितवान्। यद्यपि मेघदूतच्छाया मेघदूतात् अभिमता।

दूतकाव्यानां परम्परायाः संस्कृतसाहित्यप्रारम्भे मेघदूतादेव भवति। अतः मेघदूतकाव्योत्तरवर्तिभिः कविभिः याः रचनाः कृताः सन्ति तेषु कविभिः मेघदूतस्य प्रभावः अवश्यमेवास्ति। संस्कृतलक्षणग्रन्थेषु अपि दूतकाव्यस्य लक्षणोदाहरणानि न सन्ति। अतः परिवर्तिकविनां कृते मेघदूतमेवैकं निर्धारितदूतकाव्यस्य निकषमिति।

यद्यपि केनचित् कवयः मेघदूतस्य समीक्षापूर्तिग्रन्थानां रचनाः कृतवन्तः। अपरे कवयः किञ्चित् श्लोकपद्यं परिवर्त्य रचनां कृतवन्तः परन्तु तेषां मूले मेघदूतमेव विप्रलम्भश्रृंगारः, दूतस्यप्रयोगः, सन्देशवाहकरूपेण मार्गवर्णनम्, निवासनगरीणां वर्णनं विरहावस्थायाः वर्णनमित्यादीनि स्वरूपाणि निर्धारितानि मेघदूतस्यैवानुकरणे।

**सन्दर्भाः**


- उपाध्याय, बलदेव (2001). संस्कृत साहित्य का इतिहास, वाराणसी : शारदा निकेतन।
- उपाध्याय, बलदेव (1981). भारतीय साहित्य का अनुशीलन, वाराणसी : शारदा संस्थान।
- काणे, पी0वी0 (2002). संस्कृत काव्यशास्त्र का इतिहास, वाराणसी : मोतीलाल बनारसीदास।
- गोपाल, प्रीतिप्रभा (1999). संस्कृत साहित्य का इतिहास, जोधपुर : राजस्थानी ग्रन्थागार।
- झा, तारिणीश (2004). मेघदूतम्, इलाहाबाद : रामनारायणलाल विजयकुमार।
- त्रिपाठी, जयशंकर (2001). संस्कृतसाहित्य का इतिहास, इलाहाबाद : साहित्य भण्डार।
- तिवारी, शशि (2005). संस्कृत साहित्य का इतिहास, वाराणसी : भारतीय विद्याप्रकाशन।
- पण्डा, पी0के0 (2009). कालिदास का साहित्य–आधुनिक परिप्रेक्ष्य, दिल्ली : विद्यानिधि प्रकाशन।
- राय, विनय कुमार (1999). संस्कृत साहित्य का नवीन इतिहास, वाराणसी : चौखम्बा विद्याभवन।
- शास्त्री, दयाशंकर (2008). संस्कृत साहित्य का इतिहास, वाराणसी : चौखम्बा सुरभारती।
- शास्त्री, वेंकटराम, (1996). संस्कृत साहित्य का इतिहास, मद्रास : गोल्डेन जुबली।


******